Total printed pages:- 7

**Name ---------------------**

Roll no. ………………

# DELHI PUBLIC SCHOOL, VINDHYANAGAR

**PRE-BOARD EXAM (2020-21)**

**CLASS – _X___** **M. M. - 40**

**SUBJECT _संस्कृत** Time: 2 hrs.

---

सामान्यनिर्देशाः–

- कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 7 पृष्ठानि मुद्रितानि सन्ति।
- कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 19 प्रश्नाः सन्ति।
- उत्तरलेखनात् पूर्व प्रश्नस्य क्रमांकः अवश्य लेखनीयः।

## खण्ड ( अ ) 20 अंकाः

## (बहुविकल्पात्मकाः प्रश्नाः)

## अनुप्रयुक्त-व्याकरणम्

प्र0 1 अधोलिखितवाक्येषु रेखाङ्कितपदानां सन्धिं विच्छेदं वा कृत्वा लिखत । (केवलं प्रश्नद्वयम्) 1x 2 = 2

(i) शिवस्य पुत्रः **षडाननः** आसीत् ।

(क) षड् + आननः (ख) षट् + आननः (ग) सत् + आननः

(ii) **अस्मान्नगराद्** बहिः मम विद्यालयः अस्ति ।

(क) अस्मान् + नगरात् (ख) अस्माद् + नगरात् (ग) अस्मात् + नगरात्

(iii) तदैव **कश्चिद्** कर्मचारी समागत्य निवेदयत् ।

(क) कः + चिद् (ख) कश् + चिद् (ग) काः + चिद्

प्र02 अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत। (केवलं प्रश्नद्वयम्) 1x 2 = 2

(i) अतः बकः एव **वर्षाभिनन्दनं** करोति।

(क) वर्षा अभिनन्दनम् (ख) वर्षायाः अभिनन्दनम् (ग) वर्षे अभिनन्दनम्

(ii) **उपगङ्गम्** अयं देवालयः शोभते ।

(क) गङ्गायाः समीपम् (ख) गङ्गा समीपम् (ग) गङ्गायै समीपम्

(iii) **पिकः + च काकः च तयोः** भेदं कथम् ।

(क) पिककाकौ (ख) पिककाकयोः (ग) पिकयोः काकयोः

प्र03 रेखाङ्कितपदानां प्रकृतिप्रत्ययौ संयोज्य विभज्य वा समुचितम् उत्तरं लिखत। (केवलं प्रश्नद्वयम्) 1 x 2 = 2

(i) चित्ते – वाचि अवक्रता एव **<u>समत्वम्</u>** ।

(क) सम् + त्वम् (ख) समत्व + अम् (ग) सम् + त्व

(ii) महिमा **<u>रूपवती</u>** अस्ति ।

(क) रूप + वान् (ख) रूप + मतुप् (ग) रूप + शानच्

(iii) विद्यालये **आनन्ददायक + टाप्** प्रतियोगिता अभवत् ।

(क) आनन्ददायी (ख) आनन्ददायका (ग) आनन्ददायिका

प्र0 4 वाच्यानुसारं रिक्तस्थानपूर्तिं कुरुत। ( केवलं प्रश्नत्रयम् ) ½ x 3 = 1.5

निरूपमा – विनीते ! अधुना त्वं किं करोषि ?

विनीता – (i) ---------- नवीनं पुस्तकं शेमुषी पठ्यते ।

(क) त्वम् (ख) त्वया (ग) मया

निरूपमा – त्वं अधुना कस्यां कक्षायां (ii) .............. ?

(क) पठसि (ख) पठति (ग) पठ्यते

विनीता – मया तु नवमोत्तरकक्षायां (iii) ---------- ।

(क) पठामि (ख) पठ्यते (ग) पठ्ये

निरूपमा – शोभनम् ! अहं क्रिकेटक्रीडायाः अभ्यासं (iv) .............. ?

(क) करोमि (ख) कुर्मः (ग) क्रियते

प्र0 5 अधोलिखितेषु वाक्येषुअङ्कानां स्थानेसंस्कृतसंख्यापदानि लिखत। ( केवलं प्रश्नचतुष्टयम् ) ½ x 4 = 2

(i) अहं प्रातः 4 : 30 .......................... उत्तिष्ठामि ।

(क) सार्धपंचवादने (ख) सार्ध चतुर्वादने (ग) सपाद चतुर्वादने

(ii) प्रातः 8 : 15 .......................... वादने विद्यालयं गच्छामि ।

(क) पादोन सप्त (ख) पादोन अष्ट (ग) सपाद अष्ट

(iii) विद्यालये 11 : 00 .................................. वादने भोजनं करोमि ।

(क) एकादश (ख) एकैक (ग) एकादशः

(iv) विद्यालयात् 2 : 30 .................................. वादने गृहम् आगच्छामि ।

(क) द्वि सार्ध (ख) सार्ध द्वे (ग) सार्ध द्वि

(v) सायं 3 : 45 .................................. वादने गृहम् आगच्छामि ।

(क) पादोन चतुर् (ख) पादोन त्रि (ग) चतुर्पादोन

प्र0 6 मञ्जूषायाः उचितम् अव्ययपदानि चित्वा वाक्येषु रिक्तस्थानानि पूरयत। ( केवलं प्रश्नत्रयम् ) 1/2 x 3 = 1.5

(i) उपवनं ..................... वृक्षाः सन्ति ।

(क) बहिः (ख) परितः (ग) कुत्र

(ii) सर्वे छात्राः .................. क्रीडन्ति।

(क) कुतः (ख) पुरा (ग) अधुना

(iii) कदापि ................... न वक्तव्यम् ।

(क) वृथा (ख) श्वः (ग) सम्प्रति

(iv) यदि भोजनं वांछसि .............. आगच्छ ।

(क) तावत् (ख) तदा (ग) तर्हि

प्र0 7 रेखाङ्कितपदानां संशोधनंकृत्वा लिखत – ( केवलं प्रश्नत्रयम् ) 1/2 x 3 = 1.5

(i) मम समीपे **त्रयः** फलानि सन्ति।

(क) तिस्रः (ख) त्रिभ्यः (ग) त्रीणि

(ii) आरोग्यः मम **मित्रः** अस्ति ।

(क) मित्रम् (ख) मित्र (ग) मित्रे

(iii) श्वः मम **विद्यालये** उत्सवः आसीत्। ।

(क) अद्य (ख) ह्यः (ग) अधुना

(iv) जन्तुशालायां **अनेकाः** सिंहाः आसन्।

(क) अनेकः (ख) अनेकानि (ग) अनेके

प्र0 8 प्रश्ननिर्माणं कुरुत –( केवलं प्रश्नपंचकम्) 1/2 x 5 = 2.5

(i) बलीवर्दयोः एकः **शरीरेण** दुर्बलः आसीत् ।

(क) कीदृशः (ख) केन (ग) केण

(ii) सर्वे वन्यजीवाः **राज्याभिषेकाय** तत्पराः भवन्तु ।

(क) कस्मै (ख) कस्यै (ग) कथम्

(iii) **वराकान्** मीनान् छलेन अधिगृह्य क्रूरतया भक्षयसि।

(क) कान् (ख) कस्मै (ग) कीदृशान्

(iv) **सर्वधेनूनां** माता सुरभिः किमर्थम् रुदन्ती आसीत् ।

(क) केषाम् (ख) कासाम् (ग) काम्

(v) कृषीवलः **क्रुद्धः** अभवत्। ।

(क) कः (ख) कान् (ग) कीदृशः

(vi) मातुः सुरभेः नेत्राभ्याम् **अश्रूणि** आविरासन्।

(क) कानि (ख) किम् (ग) कः

प्र0 9 उचितम् अर्थम् चित्वा लिखत। (केवलं प्रश्नद्वयम्) 1 x 2 = 2

(i) दुर्बलः बलीवर्दः **जवेन** गन्तुम् अशक्तः आसीत् ।

(क) भारेण (ख) तीव्रगत्या (ग) कष्टप्रदानेन

(ii) **खरः** भारवहने वीरः भवति।

(क) घोटकः (ख) गजः (ग) गर्दभः

(iii) **करी** सिंहस्य किंचित् बलं जानाति।

(क) काकः (ख) गजः (ग) तुरङ्गः

प्र0 10 भाषिक कार्यम् कुरुत – ( केवलं प्रश्नत्रयम् ) 1 x 3 = 3

(i) **आरक्षी** इत्यर्थे किं पदं प्रयुक्तम् ?

(क) चौरः (ख) रक्षापुरुषः (ग) अतिथिः

(ii) **स एव वह्निः दहते शरीरम्** अत्र क्रिया पदं किम् ?

(क) वह्निः: (ख) शरीरम् (ग) दहते

(iii) **व्याघ्रं दृष्ट्वा कश्चित् धूर्तः शृगालः हसन्नाह** अत्र विशेष्य पदं किम् ?

(क) धूर्तः (ख) शृगालः (ग) कश्चित्

(iv) सुरभेरिमामवस्थां दृष्ट्वा सुराधिपः तामपृच्छत् अत्र कर्ता पदं किम् ?

(क) सुरभिः (ख) ताम् (ग) सुराधिपः

## खण्ड – आ ( वर्णनात्मकाः प्रश्नाः) 20 अंकाः

प्र011. अधोलिखित गद्यांशं पठित्वा एतदाधारितानां प्रश्नानाम् उत्तराणि लिखत–

शिक्षाप्राप्तिः मानवजीवनस्य महती आवश्यकता अस्ति। शिक्षां प्राप्य एव मनुष्यः मनुष्यः जायते। विद्याहीनः नरः पशुः एव कथ्यते। पुराकाले या गुरु–शिष्य–परम्परा आसीत् सा इदानीं दुर्लभा अस्ति। अद्यत्वे तु अनेके विद्यालयाः, महाविद्यालयाः, विश्वविद्यालयाः च सन्ति परन्तु तेषु वैदेशिक – शासनकालीना एव शिक्षाप्रणाली प्रचलिता अस्ति। वर्तमानशिक्षाप्रणाल्यां मातृभाषायाः राष्ट्रभाषायाः च अधिकं ज्ञानं न दीयते। अनेके शिक्षिताः छात्राः निजमातृभाषायां पंक्तिद्वयम् अपि लेखितुं न शक्नुवन्ति। भारतवर्षे शिक्षाप्रणाली तादृशी स्यात् या सर्वेभ्यः हितकारी भवेत्।

I एकपदेन उत्तरत–- (केवलं प्रश्नद्वयम्) ½ x 2 = 1

(i) इदानीं का दुर्लभा अस्ति ?

(ii) कीदृशः नरः पशुः कथ्यते ?

(iii) शिक्षां प्राप्य एव कः मनुष्यः जायते?

II पूर्णवाक्येन उत्तरत - (केवलं प्रश्नमेकम्) 1 x 1 = 1

(i) अद्यत्वे कीदृशी शिक्षा–प्रणाली प्रचलिता अस्ति ?

(ii) वर्तमान–शिक्षाप्रणाल्यां कस्याः अधिकं ज्ञानं न दीयते ?

III निर्देशानुसारं उत्तरत– ½ x 2 = 1

(i) अधुना' इति पदस्य अत्र कः पर्यायः अस्ति ?

(क) अद्यत्वे (ख) पुराकाले (ग) इदानीम्

(ii) 'या सर्वेभ्यः हितकारी भवेत्।' अत्र 'या' इति पदं कस्मै प्रयुक्तम् ?

(क) मातृभाषायै (ख) राष्ट्रभाषायै (ग) शिक्षाप्रणाल्यै

प्र012. भवान् केशवः ' प्लास्टिकस्य प्रयोगः पर्यावरण–नाशकः ' इति विषयम् अधिकृत्य मित्रं मनोहरं प्रति लिखिते पत्रे रिक्तस्थानानि पूरयित्वा उत्तरपुस्तिकायां लिखत । ½ x 4 = 2

विन्ध्यनगरतः

दिनांकः .......................

प्रिय मित्र मनोहर !

सस्नेहं नमः ।

अत्र कुशलं तत्रास्तु । ह्यः एव मम विद्यालये ' त्यज प्लास्टिकम् रक्ष पर्यावरणम् ' इति विषये एका गोष्ठी अभवत् । अत्रैव मया प्रथमवारं (1) .......................... यत् प्लास्टिकस्य दूरगामिनः परिणामाः घातकाः भवन्ति ।

अन्यानि सर्वाणि वस्तूनि मृत्तिकायां विनश्य विलीयन्ते परं (2) ...................... तु कदापि न अपक्षीयते । न गलति न च विलीयते । एवं (3) .......................... कृते महती हानिः भवति । वयं प्रातः जागरणात् निद्रापर्यन्तम् अस्य प्रयोगं (4) .............. । पर्यावरणस्य रक्षणे एव अस्माकं रक्षणम् । आशासे त्वमपि जागरूकः भूत्वा अन्येभ्यः अपि प्रेरणां प्रदास्यसि ।

भवतः मित्रम्

केशवः

**मंजूषा – ( पर्यावरणस्य , ज्ञातम् , कुर्मः प्लास्टिकम् )**

प्र013 मंजूषायां प्रदत्तशब्दानां सहायतया चित्रं दृष्ट्वा त्रीणि वाक्यानि लिखत। 1 x 3 = 3

मंजूषा – शाकविक्रेता , कोलाहलः , कदली , आलुकम् , गुंजनम् , कुक्कुरः , बालिका , जनाः , सुन्दरम् , अनुभवन्ति कदलीफलानि , आपणम्



**अथवा**

'मम प्रियक्रीडा' इति विषयम् अधिकृत्य मंजूषायां प्रदत्तशब्दानां सहायतया त्रीणि वाक्यानि संस्कृतेन लिखत –

–मंजूषा

( बालकाः, खेलन्ति, आगच्छन्ति, दर्शकाः, द्रष्टुम्, धावकाः, सह, कन्दुकेन, इच्छन्ति, क्रीडाक्षेत्रम्, खेलभावना)

प्र0 14 अधोलिखितवाक्यानां संस्कृतभाषायां अनुवादं कुरुत – (केवलं प्रश्नद्वयम्) 1x 2= 2

(i) मैं विन्ध्यनगर में पढ़ता हूँ ।

(ii) गर्मी की छुट्टियों में तुम कहाँ जाओगे ?

(iii) पर्यावरण की सुरक्षा अनिवार्य है ।

प्र015 अधोलिखित गद्याशं पठित्वा एतदाधारितानां प्रश्नानाम् उत्तराणि लिखत –

विचित्रा दैवगतिः। तस्यामेव रात्रौ तस्मिन् गृहे कश्चन् चौरः गृहाभ्यन्तरं प्रविष्टः। तत्र निहितामेकां मंजूषाम् आदाय पलायितः। चौरस्य पादध्वनिना प्रबुद्धोऽतिथिः चौरशंकया तमन्वधावत् अगृह्णाच्च, परं विचित्रमघटत। चौरः एव उच्चैः क्रोशितुमारभत "चौरोऽयं चौरोऽयम्" इति। तस्य तारस्वरेण प्रबुद्धाः ग्रामवासिनः स्वगृहाद् निष्क्रम्य तत्रागच्छन् वराकमतिथिमेव च चौरं मत्वाऽभर्त्सयन्। यद्यपि ग्रामस्य आरक्षी एव चौर आसीत्। तत्क्षणमेव रक्षापुरुषः तम् अतिथिं चौरोऽयम् इति प्रख्याप्य कारागृहे प्राक्षिपत्।

एकपदेन उत्तरत (केवलं प्रश्नद्वयम्) ½ x 2 = 1

(i) चौरः कः आसीत् ?

(ii) दैवगतिः कीदृशी भवति?

(iii) रक्षापुरुषः अतिथिं कुत्र प्राक्षिपत् ?

पूर्णवाक्येन उत्तरत –( केवलं प्रश्नमेकम् ) 1 x 1 = 1

(i) ग्रामवासिनः किम् अकुर्वन् ?

(ii) चौरस्य पादध्वनिना प्रबुद्धोऽतिथिः किमकरोत् ?

प्र016. अधोलिखित पद्यांशं पठित्वा एतदाधारितानां प्रश्नानाम् उत्तराणि लिखत –

क्रोधो हि शत्रुः प्रथमो नराणां
देहस्थितो देह विनाशनाय ।
यथास्थितः काष्ठगतो हि वह्निः
स एव वह्निर्दहते शरीरम् ।।

एकपदेन उत्तरत (केवलं प्रश्नद्वयम्) ½ x 2 = 1

(i) वह्निः कं दहते ?

(ii) क्रोधः केषां प्रथमः शत्रुः अस्ति ?

(iii) क्रोधः कुत्र स्थितो भवति ?

पूर्णवाक्येन उत्तरत –( केवलं प्रश्नमेकम् ) 1 x 1 = 1

(i) कथं अग्निः शरीरं दहति ?

(ii) देहस्थितः क्रोधः किमर्थं भवति ?

प्र017. अधोलिखित नाट्यांशं पठित्वा एतदाधारितानां प्रश्नानाम् उत्तराणि लिखत –

काकः – आम् सत्यं कथितं त्वया वस्तुतः वनराजः भवितुं तु अहमेव योग्यः।

पिकः – (उपहसन्) कथं त्वं योग्यः वनराजः भवितुं, यत्र तत्र का –का इति कर्कशध्वनिना वातावरणमाकुलीकरोषि। न रूपं न ध्वनिरस्ति। कृष्णवर्णं, मेध्यामेध्यभक्षकं त्वां कथं वनराजं मन्यामहे वयम् ?

काकः – अरे! अरे! किं जल्पसि ? यदि अहं कृष्णवर्णः तर्हि त्वं किं गौराङ्गः? अपि च विस्मर्यते किं यत् मम सत्यप्रियता तु जनानां कृते उदाहरणस्वरूपा 'अनृतं वदसि चेत् काकः दशेत्' इति प्रकारेण। अस्माकं परिश्रमः ऐक्यं च विश्वप्रथितम् अपि च काकचेष्टः विद्यार्थी एव आदर्शच्छात्रः मन्यते।

पिकः – अलम् अलम् अतिविकत्थनेन।

एकपदेन उत्तरत (केवलं प्रश्नद्वयम्) ½ x 2 = 1

(i) कस्य रूपं न ध्वनिरस्ति ?

(ii) केषां कृते सत्यप्रियता उदाहरणस्वरूपा ?

(iii) काकस्य परिश्रमः ऐक्यं च कुत्र प्रथितम ?

पूर्णवाक्येन उत्तरत –( केवलं प्रश्नमेकम् ) 1 x 1 = 1

(i) काकः कथं वातावरणम् आकुलीकरोति ?

(ii) काकचेष्टः विद्यार्थी कीदृशः भवति ?

प्र018 अधोलिखितश्लोकयोः अन्वयम् उचितपदैः पूरयत। ½ x 4 = 2

त्यक्त्वा धर्मप्रदां वाचं परुषां योऽभ्युदीरयेत् ।
परित्यज्य फलं पक्वं भुङ्क्तेऽपक्वं विमूढ़धीः ।।

मंजूषा – परुषाम्, अपक्वम्, विमूढधीः, वाचम्

अन्वयः – यः धर्मप्रदां (i) ............... त्यक्त्वा (ii) ............... (वाचं) अभ्युदीरयेत् (सः) (iii) ............... पक्वं फलं परित्यज्य (iv) ............... (फलं) भुङ्क्ते।

**अथवा**

मंजूषायाः साहायतया श्लोकं पठित्वा भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत –

विद्वांस एव लोके स्मिन् चक्षुष्मन्तः प्रकीर्तिताः।
अन्येषां वदने ये तु ते चक्षुनामनी मते ।।

**मंजूषा – आनने , विद्वांसः , नेत्रम् , नेत्रवन्तः**

भावार्थः – विद्या एव नरस्य (i) .................... अस्ति जनाः अनया एव संसारे सर्वविधं व्यवहारं कर्तुं समर्थाः भवन्ति। अतः अस्मिन् संसारे केवलं (ii) .................... ज्ञानिनः विचारशीलाः एव (iii) .................... कथिताः। अन्येषां विद्यारहितानाम् (iv) ........... तु ये चक्षुषी भवतः ते तु नाममात्रो एव। अतः अस्माभिः सर्वथा विद्या प्राप्त्यर्थम् एव प्रयतनीयम्।

प्र019 अधोलिखित – कथांशं समुचित क्रमेण लिखत – ½ x 4 = 2

(क) कथम् एकैकशः व्याघ्रभक्षणाय कलहं कुरुथः ?

(ख) बुद्धिमती पुत्रद्वयोपेता पितुर्ग्रहं प्रति चलिता।

(ग) व्याघ्रमारी काचिदियमिति मत्वा व्याघ्रो भयाकुलचित्तो नष्टः।

(घ) सा धाष्ट्र्यात् पुत्रौ चपेटया प्रहृत्य जगाद।

0000000000000000000000000000000000000000